नं. ५१०१

शत पथ ब्राह्मणं

११श काण्डम्
पिस्वरं

पत्र ४ ———— सं.

संहिता ब्राह्मणम्

5109

F. = 4

[illegible]

[illegible]

५१०९

४

याह्विनु श्रीश्रीधन्नजीसुतविद्याधरनीपोथी

याह्विकुदेवकस्मसुनुकृ एाकस्मने याह्विनु विद्याधरसुनुया।
सहदेवे अष्टाध्यायीकांडनीपोथीकस्मावणिआपी ३ ११ ॥

[illegible] कृवे वनाश्वरा [illegible] नीपोथी

१३०

एकादशकांड ११
अष्टाध्यायीकांड २२



॥ॐ नमो गणेशाय॥ ॥संवत्सरो वै यज्ञः प्रजापतिः। तस्यैतद्द्वारं यदमावास्या चंद्रमा एव
द्वारपिधानः॥१॥ स यो ऽमावास्यायामग्नी आधत्ते यथा विवृतायां द्वारि द्वारा पुरं प्रपद्येत स ततः एवं
स्वर्गं लोकमियादेवं तद्यो ऽमावास्यायामाधत्ते॥२॥ अथ यो नक्षत्र आधत्ते यथापिहितायां द्वार्यद्वारा पु
रं प्रपित्सेत्स जिह्मः पुरः स्यादेवं तद्यो नक्षत्र आधत्ते तस्मान्न नक्षत्र आदधीत॥३॥ यदह्वार विषः। न पुरस्ता
न पश्चाद्दृश्येत तदहरुपवसेत् हि ह्येष इमं लोकमागच्छति तस्मिन्निहवसति॥४॥ सर्वे देवा वसंति। स
र्वाणि तानि सर्वा देवताः सर्व ऋतवः सर्वे स्तोमाः सर्वाणि पृष्ठानि सर्वाणि छंदांसि॥५॥ सर्वेषु देवा
स्य देवेषु। सर्वेष्वृतुषु सर्वासु देवतासु सर्वेष्वृतुषु सर्वेषु स्तोमेषु सर्वेषु पृष्ठेषु सर्वेषु छंदःस्वग्नी आ
हितो भवतो यो ऽमावास्यायामाधत्ते तस्मादमावास्यायामेवाग्नी आदधीत॥६॥ द्वा वासौ वैशाखस्या
मावास्या। तस्यामादधीत सा रोहिण्या संपद्यते। आत्मा वै प्रजा पशवो रोहिण्यात्मन्येवैतत्प्रजा
यां पशुषु प्रतितिष्ठत्यमावास्या वा अग्न्याधेयरूपं तस्मादमावास्यायामेवाग्नी आदधीतापौर्ण
मास्यामन्वारभेत। अमावास्यायां दीक्षेत॥७॥ ब्राह्मणं॥१॥ घ्नंति वा एतद्यज्ञं। यदेनं तन्वते यन्वै
राजानमभिषुण्वंति तत्तं घ्नंति यत्पशुं संज्ञपयंति विशासति तत्तं घ्नंत्युलूखलमुसलाभ्यां १

दृष्टुपतास्यात् हविर्यज्ञं घ्नंति॥१ तं दत्वायज्ञं। अग्नावेवयोनिरेतोन्नतं सिंचत्यग्निर्वै योनिर्य
ज्ञस्य स ततः प्रजायते तद्दशातः आहुतीः संपादयेद्यो नो वषट्क्रियते॥२ अयं वै यज्ञो योयं पवते। सो
यमेक इव पवते सोयं पुरुषेंतः प्रविष्टो दशधा विहितः स एवं वंत्तस्के हे: प्राणोरग्नयोनेरधि
जायते सैषा दशाक्षरा विराट् सैषा संपन्नयज्ञः॥३ अथो अपि नवस्फः। संन्यूनां विराजं करोतिप्र
जननाय न्यूनाद्वा इमाः प्रजाः प्रजायंते सैषा संपन्नयज्ञः॥४ अथो अप्येकातिरिक्ता स्यात् सा प्रजाप
तिमभ्यतिरिच्यते सैषा संपन्नयज्ञः॥५ अथो अपि द्वे अतिरिक्ते स्यातां द्वंद्वं वि मिथुनं प्रजननं मि
थुनमेवैतत्प्रजननं क्रियते सैषा संपन्नयज्ञः॥६ अथो अपि तिस्रोतिरिक्ताः स्युः द्वंद्वमह मिथुनं
प्रजननमथ यज्ञो जायते तत्तृतीयं सैषा संपन्नयज्ञः॥७ अथो अपि चतस्रोतिरिक्ताः स्युः तद्यथै
वैकं वंचतस्त्रस्त्रयो वा इमे लोकास्तदिमानेव लोकांस्तिस्रो निराप्नोति प्रजापतिर्वा अतीमांल्लोकां
श्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति सैषा संपन्नयज्ञः॥८ स यद्वा भ्याम्नंतदनं। सो यज्ञो यत्संव
रतिरिक्तं तदतिरिक्तं सोयज्ञः। सैष वै दशात्यधि संपदेषां विराट्यामिषा सह सोन॥९ आजिवा एते
धावं" ति ये दर्शपूर्णमासाभ्यां यजंते सा वि पंचदशाच वर्षाणि यजेत तेषां पंचदशानां वर्षाणां त्रिंशणवश

स्वा

तानिषष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च विंशानि तानि षष्टिश्च संवत्सरस्य रात्रयस्ता रात्री
राप्नोति ॥१०॥ अथापराणि पंच दशैव वर्षाणि यजेत । तेषां पंचदशानां वर्षाणां त्रीणि च विंशानि
षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च विंशानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नो २
ति तद्धैव संवत्सरमाप्नोति ॥११॥ मर्त्या ह वा अग्रे देवा आसुः । स यदैव ते संवत्सरमापुरथामृता आ
सुः सर्वं वै संवत्सरः सर्वं वा अक्षय्यमेतेनो हास्याक्षय्यं सुकृतं भवत्यक्षय्यो लोकः ॥१२॥ स ऽआ
हुतामेकः । य एवं विद्वांस्त्रिंशतं वर्षाणि यजते तस्मात् त्रिंशतमेव वर्षाणि यजेत यद्यु दाक्ष
यणयज्ञी स्याद् यो ऽपि पंचदशैव वर्षाणि यजेतात्र ह्येव सा संपत्संपद्यते द्वे हि पौर्णमास्यौ यज
ते द्वे ऽमावास्ये अत्रो एव खलु सा संपत् भवति ॥१३॥ ब्राह्मणं ॥२॥ पौर्णमासेनेष्ट्वा । इन्द्राय विमृध
ऽनुनिर्वपति तेन यथेष्ट्यैवं यजते ऽमावास्येनेष्ट्वादित्यै चरुमनुनिर्वपति तेन यथेष्ट्यैवं यजते
१ स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति वीर्यं वि यज्ञस्यादबलात्थो तदग्नीषोमीयं पौर्ण
मासं हविर्भवति तत्रानिन्द्रोऽपत्थेति किं च नास्तिक्रियते एते नो हास्यानिन्द्रं हविर्भवत्येतेन संस्तो २

ति

सोऽथ यद्विमृधे तेषे सर्वो ऽह हि मृधो नाशुः पौर्णमासेन हन्ति ॥२॥ अथ यदामावास्येनेष्ट्वा अ-
दित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं न
पुरस्तान्न पश्चाद्ददृशेऽत तानि तदन्नं हविर्भवति तेनाप्रतिष्ठितमियं वै पृथिव्यदितिः
सेयमद्य प्रतिष्ठिते तेनो हास्यैतद्दैवं हविर्भवस्येतेन प्रतिष्ठितमेतन्नु तद्यस्मादनु निर्व-
पत्यथ यस्मान्नानु निर्वपेत् ॥३॥ स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधेनु निर्वपति स इन्द्रो मे यज्ञो स-
दिति सर्वो वै यज्ञ इन्द्रस्यैव सर्व यज्ञो यज्ञ इन्द्रस्यैव तेनो हास्यैतत्सेन्द्रं हविर्भवत्येतेन
सेन्द्रो यज्ञः ॥४॥ अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनु निर्वपत्यामावास्येन वा अनु निर्वपे-
त्पौर्णमासेन वा इन्द्रो वृत्रमहंस्तस्मा एतद्वृत्रं जघ्नुषे देवा एतद्धविरनु निरवपन् यदामावा-
स्यं किमनु निर्वपेयानु निर्वपेदिति तस्मान्नानु निर्वपेत् ॥५॥ स यत्पौर्णमासेनेष्ट्वा । अथान्य-
द्धविरनु निर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनु निर्वपति द्विषन्तं ह स भ्रातृव्यं प्रत्युद्यमते

अथयःपौर्णमासेनेष्ट्वापौर्णमासींयजतेऽमावास्येनामावास्यामसपत्नाहिवास्मानुप्र
पबाधास्त्रीन्नवत्ति।। द्विपौर्णमासेनावेदेवाः पौर्णमासींयजमानोऽमावास्येनामावास्यां
स्यांद्विषन्तएवपाप्मानमपाघ्नन्तद्विषेप्राजायन्तसयोहैवंविद्वान्पौर्णमासेनेष्ट्वापौर्णमा
सींयजतेऽमावास्येनामावास्यांद्विषन्तएवपाप्मानमपहतेद्विषेप्रजायतेसयद्यनुनि
र्वपेद्यद्वाद्दक्षिणेनान्नादक्षिणं हविःस्यादितिद्व्याकुर्दर्शपौर्णमासयोर्द्वेविषादक्षिणायुद्दक्षा
हार्यऽइतिचानुनिर्वाप्यस्याथाभ्युदितस्य।।७।।ब्राह्मणं।।३।। ।।तद्वैकेद्दृष्टोपवसन्तिनेयोनो
दतेत्यन्नस्यवाहेतोरनिर्ज्ञायवाथोतोपवसन्तियत्याथेनमुताभ्युदेतिसयद्यगृहीतंह
विरभ्युदियात्प्रज्ञातमेवतदेषेवव्रतचर्यायासर्वंदुग्धंदधिहविरातंचनंतद्गुर्वन्तिव्र
तिम्मुञ्चन्तिवत्सांस्तान्पुनरपाकुर्वन्ति।।१ तानपराह्णेपर्णशाखयापाकरोतितद्यथैवा
ध दःप्रज्ञातमामावास्यंहविरेवमेवतद्यथव्रतचर्यंवानोदारौतेहसतगृहीतंवाद्धविरभ्युदिया २

रा...पर्सञ्चा एव या पाकरोति ॥ तद्यथैवादः प्रज्ञातममावास्यं हविरेवमेतद्यदुव्रत
वर्यैवानादाग्नेः । स तं गर्हीतं वाह विरन्त्युदियादित रथातर्हि कुर्यादितानवरुद्धलां
स्तुफलीकृतांश्च त्वा स्युपेत्याः । स स्वानग्नये दात्रेऽष्टाकपालं पुरोडाशं श्रपयति ॥२॥
अथ यस्य विधुः ॥ दुग्धं दधि तदिन्द्राय प्रदात्रे अथ तदानीं दुग्धं चित्त्वा विशिपिविष्टाये
तांस्तंडुलांश्रुत वरुद्धं श्रपयति वरुद्धाद्युवस यत्र कुच तंडुलानावपेति ॥३॥ तद्यदे
वं नवति ॥ एष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतदुपेत्सीत्तमपारात्सीत्त
मस्माऽ अग्निर्दाता ददातीन्द्रः प्रदाता प्रयच्छति तमस्माऽ इन्द्राग्नी यत्तं ददतस्तेनेन्द्रा
ग्निभ्यां दात्तेन यज्ञेन यजत तथ यद्विष्णवे शिपिविष्टायेति यतो वै च्छिद्रथ
यच्छिपिविष्टायेति यमुपेत्सीत्तमपारात्सीत्तच्छिपितमिव यज्ञस्य नवति तस्माच्छि
पिविष्टायेति तत्रो यद्विन्दुयात्तद्धान्नादच्छिद्रणं हविः स्यादिति ह्याऽउ रथ्य प
देवानादिपाद्यथोपवसेत् ॥४॥ ब्राह्मणं ॥४॥ अथ यो मावास्येति मन्यमान उ
पवसति ॥ अथैष पश्चाद्दृश्येत दस्रो सहैष दिव्यः श्वा स यजमानस्य पशून न त्य
त्वचति तदपञ्चायये स्याद्देवा यश्चित्तिकृतं तस्मादु हैतदेषाव चन्द्रमसादिति ॥
वायामुपसर्पति ॥ एतन्नाहैतदुपतपदाव चद्रात श्वल्लेचित मित्यतमुद्धावतदा
वचति ॥५॥ श्वाश्यामिमसढति ॥ चन्द्रमा वा असौ मोदवानामन्नं तं पौर्णमास्या
मद्भिदृश्वन्ति सो पर पञ्चो पऽओषधीः प्रविशति पशुनाम्नां वाऽ अपऽओषधीरदन्ति
तादनमेताः रात्रिं पश्चन्न्यः सं नयति ॥६॥ सोऽ यामावास्येति मन्यमानउप

वसति॥ अथैष पश्चाद्दक्षिणाद्यजमानो यज्ञपथादेति तदाहुः कथं कुर्यादित्याय
ज्ञपथाद्यजताऽ३ न यजताऽ३ इति यजेतादेव न ह्यन्यदपक्रमणं न वतिष्ठः
श्वः एवेष्ज्यायानुदेति स आमावास्यविधेनेव ष्ट्वाप्येष्टिमनु निर्वपति
तदहर्विजिष्ठावा॥४॥ तस्य त्रीणि हवींषि भवंति॥ अग्नये पथिकृते ष्टाक
पाले पुरोडाशमिंद्राय वृत्रघ्ने एकादशकपालमग्नये वैश्वानराय
द्वादशकपालं पुरोडाशं॥५॥ स यदग्नये पथिकृते निर्वपति॥ अग्निर्वै
पथः कर्त्ता स यस्मादेवादो यजमानो यज्ञपथादेति तमेव सोऽग्निः पंथानं ॥४॥
३॥ मापादयति॥६॥ अथ यदिंद्राय वृत्रघ्ने॥ पाप्मा वै वृत्रो यो भूतवीरयि
त्वा तिष्ठति कल्याणात्कर्मणः साधोस्तमेतदिंद्रेणैव वृत्रघ्ना पाप्मानं वृत्रं
हंति तस्मादिंद्राय वृत्रघ्ने॥७॥ अथ यदग्नये वैश्वानराय॥ द्वादशकं
पाले पुरोडाशं निर्वपति यत्र वा इंद्रो वृत्रमहंस्तमग्निना वैश्वानरेणास
मदहत्तदस्य सर्वं पाप्मानं समदहत्संहत्तथो एवैष एतदिंद्रेणैव वृत्र
घ्ना पाप्मानं वृत्रं हत्वा तमग्निना वैश्वानरेणास्य दहति तदस्य सर्वं पाप्मा
नं संदहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परि
शिष्यते॥८॥ तासु सप्तदश सामिधेन्यो भवंति॥ उपांशु देवता यजति